णत्वात्। पक्षधर्मावच्छिन्नसाध्यव्यापकमध्य एव प्रवेशाद्वा। पक्षधर्मीपादनसाधनसमानाधिकरणोपाधिव्यक्ति धर्म
त्वादिति चेत्। अत्र वदंति। घटः पृथिवी द्रव्यत्वादित्यादौ घटान्यत्वावच्छिन्नपृथिवीत्वव्यापकं घटावृत्तिगुणव त्र५
त्त्वमुपाधिः। तत्र चोक्तलक्षणाव्याप्तिः। घटान्यत्ववृत्तिसाध्यव्यापकस्य तस्य तद्वृत्तिसाधनाव्यापकत्वा
भावात्। पक्षसाधनाव्यापकस्य तस्य तद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वाभावात्। स्वानधिकरणीभूतसाध
नाधिकरणीभूतपक्षधर्मावच्छिन्नसाध्यव्यापकत्वाभावाच्च। न च शुद्धसाध्यव्यभिचारानुन्नायकत्वेनायमुपाधि
रेव न भवतीति वाच्यं। द्रव्यत्वं पृथिवीत्वव्यभिचारि द्रव्यत्वपरत्वं तत्र श्रामयत्वानीति प्रतीतिविशेष्यत्वे सति घटा
वृत्तिगुणवत्त्वव्यभिचारित्वात्। श्रामयत्ववदित्यादिक्रमेण तत्संभवात्। अत्र स्वरूपासिद्धिवारणाय यद्धर्मवृत्तीति।
न च व्यभिचारावारकत्वेन वैयर्थ्यमिति वाच्यं। त्रितयगोचरप्रतीतिविशेष्यत्वस्य व्यर्थविशेषणकत्वेनानवकाशात्। व्या
प्यविशेष्यत्वेन व्यर्थविशेषणकानवकाशान्। व्यर्थविशेष्यत्वनिवारणाय घटत्ववृत्तीति। स्वरूपपरत्व एव व्यभिचारवारणा

यापदत्वे ति। एवं चैतत्पदद्वयमव्याप्यत्वव्यभिचारणाय विशिष्य मिति मंतव्यं। व्याप्तिग्रहस्थलाभार्थमाह। प्रमेयत्वे ति। घट
त्वव्यभिचारवारणाय। सत्यंतं। यद्यपि द्रव्यत्वव्यभिन्नघटधर्मान्यत्वसति घटाद्यनिरूपितत्ववत्त्वव्यभिचारित्वादिति हेत्वश्च
रवं उ तावेव नव्याप्तिविरोधः कतिथ्ययं। न च यद्व्यभिचारित्वमात्रेण साधनस्य साध्यव्यभिचारानुमितिः स एवोपा
धित्वेन संग्राह्यः अस्य च विशेषणांतरस्याक्षेपेणानर्थक्यमिति वाच्यं। एवं हि शब्दत्वस्य साध्यप्रमेयत्वादौ साधना
व्यापकत्वरूपत्वादिकमुपाधिरवनेनेति किं तत्संग्रहार्थमुक्तलक्षणानुसरणप्रयासेन। स्वासामर्थ्ये नितरां न
नायलक्ष्यतावच्छेदके विशेषणदानमनुचितमेवेति। वयं तु ब्रूमः। यद्धर्मावच्छिन्नव्यापकस्य यत्र व्यभिचारोन्नायकस्योपा
धित्वेन संग्राह्यत्वं तदा पर्यवसितसाध्यव्यापकत्वे साध्यसामानाधिकरण्ये सति वा साध्यव्यभिचारिसाधनाव्या
पकत्वमुपाधिलक्षणं बोध्यं। अत्र च निरधिकरणसाध्यविरुद्धत्वस्य सर्वथोपाधित्वव्यवहाराररहितेनित्या निवा
रणाय सत्यंतं। यं जनत्वादेः धूमादिहेतावुपाधित्वप्रसंगवारणाय साध्यव्यभिचारीति। न त्ववत्युपाधिज्ञान
एवं काल एव साधनसाध्यव्यभिचारनियमात्तदुभयस्य न दाराहूषकत्वं न स्यादिति चेत्। अत्रांत्रासि। न ह्युपाधेर्नि
वरूपेणज्ञातस्य स्वव्यभिचारोन्नायकत्वं किं तु स्वस्य साध्यव्यापकत्वपक्षधर्मावच्छिन्नसाध्यव्यापकत्वा
दिना। इदं तु सकलसंग्राहकमात्रं। यद्यासाधारणादीनां विपक्षवृत्तित्वादिना दूषकत्वं। संग्राहकमा ४३

त्रमनुगमकोपाधिव्यापकत्वादि। एवं च सर्वैरस्यात्यपेक्षा। अन्यथापर्यवसितत्वाद्यस्फुरणे शुद्धसाध्यव्यापकत्वस्फु
रणेपि व्यभिचारोन्नायकत्वं न स्यात्। न चानुमितिप्रतिबंधकज्ञानविषयतावच्छेदकमुपाधित्वमिति निरू
पितदूषकत्वविरोध इति वाच्यं। तस्य यथाश्रुताभिप्रायेण साधनव्यापकत्वादौ ज्ञानाभिप्रायेण वा सर्व
समाधेयत्वात्। न त्वेवं पर्यवसितत्वरूपपक्षधर्मावच्छिन्नवह्निव्यापकत्वेन धूमाव्यापकत्वेन ज्ञानस्य पाषाणवत्त्वा
देः शुद्धसाध्यव्यभिचारानुमापकत्वं स्यात्। अन्यथा तेन रूपेण ज्ञातस्य स्फूर्तरूपवत्त्वादेरपि तन्न स्यादविशेषा
दिति चेन्न। धूमवह्निव्यभिचारस्य बाधितत्वेन तत एव तदनुमित्यसंभवात्। बाधानवतारदशायां लिंगादि
प्रतिसंधानकालतन्मानुमितरिष्टत्वादिति दिक्। न च यद्व्यभिचारित्वेनेत्यादिना निरुक्तस्यैव सकलसंग्रा
हकत्वे सत्त्व तिकिमनेनेति वाच्यं। तस्य लक्ष्यतावच्छेदकत्वेनोप - योगात्तत्रास्य लक्षणत्वात्। अथ
वग्रंथरुता लौकिकप्रत्यक्षलक्षणं लक्ष्यतावच्छेदकमभिप्रेत्य विवृतं। इतरस्तेदानुमानेकस्य पक्षता
वच्छेदकत्वेनोपयोगादिति संक्षेपः। क्वचित्साधनमिति। ध्वंसाविनाशी जन्यत्वादित्यादौ भावत्वाद्युपाधि
रित्यर्थः। क्वचित्पक्षवादीति। चाक्षुषत्वं हि रिंद्रियप्रत्यक्षः प्रमेयत्वादित्यादौ रूपवत्त्वाद्युपाधिरित्यर्थः। क्वचि
न्महानसत्वादीति। अयं धूमवान्वह्निमत्त्वादित्यादौ यंजनवत्त्वाद्युपाधिरित्यर्थः। सर्वविधस्योपाधेरुक्तस

रूपमुपपादयति। तथा हीति। अतएवेति। न हि विशिष्टव्यभिचारसाधनानंतरं विशेष्यव्यभिचारसाधनं प्रय
नार्थं निरस्यात्। किंतु तत्र सिद्धिरवपक्षधर्मताबलाद्विशेष्यव्यभिचारमादाय। यदा लिंगेन विना पक्षसाध्यसि १२
ध्यपर्यवसानं तत्स्वपक्षधर्मताबलात्सिध्यतीति भावः। एतादृवदर्शयति। अन्यथेति। एतच्च प्रकृते। निष्प्रयं। अ १।७
न्यत्रोक्तप्रकारेण शुद्धसाध्यव्यभिचारानयनेऽपि नार्थं निरस्मिति ध्येयं। ननु विशेष्याभावविशिष्टाभावयो
रीदन विशेष्यव्यभिचारविशिष्टव्यभिचारयोरपि नेदानपक्षधर्मताबलादपि विशिष्टव्यभिचार एव सिध्ये
त। अनुमितव्यापकतावच्छेदकरूपप्रकारकत्वनियमादित्यानुध्येयेनाह। याकेनेति साध्य इतिवच्छत्यक्तपदं २।६
बाहिरिंद्रियप्रत्यक्षपरं। तद्रूपवादो व्यभिचारादादासत्यादिद्रव्यत्वं अव्यभिचारित्वापूर्वकं यत्स्यात्यर्थः। न नु षष्ठीत तं
त्पुरुषो। तथा सति सत्यंतमात्रस्यैव व्याप्यत्वे विशेषवैयर्थ्यापत्तेः। दृष्टांतस्वरूपासिद्ध्यापत्तेश्च। तद्वद्भेदे
व्यभिचारादादाद्यत्वात्यादि। अन्वयद्यपि प्रत्यक्षत्वव्यापकत्वाभिचा। रित्वादित्यस्यैवगमकत्वेऽव्यापदसद्दितमा
मे तत्वार्थो। तथापि व्यभिचारस्यानावगतत्वाद्व्यतत्द्भतितप्रतियोगिकारवचवेत्ता वाह। तुतो न व्यर्थविशेषण ४४
त्वमिति भावः। वस्तुतस्तत्स्वप्रत्यक्षत्वव्यापकपदस्तुतत्रूपत्ववाक्याधिपरमतो नोक्तदोषः। न त्वेवम
स्यापाधिव्यक्तसाध्यव्यभिचारानुमापकत्वेन निर्वाहत्। तदाहितन्निर्वह्निनियद्भिनस्यपर्यवसितसाध्यव्यापकत्वश्च।

513

नतिस्त्र कद्व्याचाव्यभिचारित्वं तथा दिव्य ... तत्त पक्षे तत्रवह्नेयन... त्वे ... व्या तथा यथा
पभिचारि वादिव्यव ... नुमानं तत्रनाहिदके ... नैव क्रपेता) नुमा

न्यभिचारानुमानप्रयोजकं कत्व वृत्तीतिवाच्यं। विपक्षबाधकत्वेन व्याप्तिग्रहदोषायिकतया सत्प्रयोजकत्व
२२ संभवात्। यद्यपि श्रमयत्वादिहेतौ प्रत्यक्षव्यभिचारित्वानुमाने मित्तियम इति भावः। एवं प्रकारसाधनं १२
चछिन्नसाध्यव्यापकोपाधिस्थलेप्याह। तथा मित्रेति। द्विविधः एवंविध। न च घटत्वदृष्टांतसाधनविक
योधर्मत लत्वं यत्र मित्रात्तनायेनेऽक्ततोप्यात्वाकादिना शाकपाकपाकजत्वाला बोधगतः। तस्यैवाधिटत्वेऽभिन्नस्य धा
सोवप हृष्टांतत्वात्। तत्रोपाधस्ताबानवगतोसंदिग्धोपाधिनापात्रः। डित्थ इति दृष्टघट इति मित्रातनयस्यसंज्ञा
दातत्त्वत्रि...तिएवाघटत्वमित्यथाऽऽह। अन्ये तु यत्र किंचिदधिकरणव्यक्ति दृष्टान्तयंतानावि...प्रतियो
गित्वमवाच्यभिचारित्वं प्रकृतविवक्षितं तत्र यद्यपि तत्सामानाधिकरण्यमात्रपर्यवसन्नं च व्यभिचारि साध्यराणे
तथापि सतीतिपदमहिम्ना विशिष्टवैशिष्ट्यलालाघदधिकरणावच्छेदनमित्रातनयत्वसामानाधिकरण्य
रूपतद्व्यभिचारित्वं विषयतादधिकरणावच्छेदनशाकपाकजत्वव्यभिचारविशिष्टालेव ष्यालिम
नास्तनतव्यभिचारि साध्यराणं दृष्टं वज्ञयामरूपं किं विन्मित्रातनयव्यक्तिदृष्टत्वाद्भूतात्यवेष्यस्पैवेति न
तत्र साधनविकल्पमपीत्याहुः। इत्थं साध्यासृद्धव्यभिचारानायकस्यैवोपाधित्वमंगीकृत्य विशिष्ट साध२
साध्यव्यापकस्यापि माहात्म्यदवतद्यात्वमितिदर्शितं। संप्रतिसाहासाविशिष्टसाध्यव्यभिचारानुमानं।

न तद्धेतिदोषः। किंतु साध्यव्यापकत्वादिति व्यभिचारित्वात्साध्य ... व्यापकत्वादि ...

यात्तदुन्नायकस्य दोषत्वे विशेषाभावात्। कथंचित्तदुन्नायकत्वेनोपाधिरित्यभिप्रेत्याह॥ यद्वेति। साधनव्यभि
चारीति। साधनव्यभिचारित्यस्य साधनाव्यापक इत्यर्थः। साध्यव्यभिचारोन्नायकः स्वव्यभिचारेण
तिशेषः। तेन साध्यव्यभिचारोन्नायकत्वप्रयोजकत्वादौ नातिप्रसंगः। अन्यकल्पत्याह। अर्थान्तरस्थले तु
१४ फलदशायामप्रासकालत्वादिदूषणं। तत्राभावादिति। तत्रास्फुरणादित्यर्थः। तत्रेति। यद्यप्यनुकूलतर्का
ग्रंथरूपमतेन व्याप्तिग्राहकस्थापितहेताववनिवर्त्तकाभावेन व्यभिचारसंशयात्साध्यव्यापकनिश्चय इति भा
वः। यद्यपि पर्वतपदमित्रपर्वतावयवहत्तिरूपादरूपिण्यां वह्निं कं तथापि ... उपाधिरूपाधितायी तस्य तत्त्वेन प्रयो
जकं किंतु तस्य पक्षमात्रव्यावर्त्तकत्वमेव तेनैवोपाधिः साधनाव्यापकत्वनिर्वाहादित्यभिप्रेत्याह तत्र
प्रयोजकं। एवं वा उपाधितप्रयोजकीभूतपक्षमात्रव्यावृत्तिप्रयोजकविशेषकं एव वा इति पक्षतद्धर्मयोर्था
ऽवत्वः। निश्चयथा संखं तर्कमाह। तदुकार्षणात्यादि। पत्राद्यत्तर्कमाह। घटेति। प्रतियोगिध्वंस
प्रागभावानवच्छिन्नसमयस्य प्रतियोगिकालनियमादिति भावः। घटादानस्य नप्रसंगमहाभूतस्यका
ते तर्कमिति। रूपादरूपिरूपाद्यव्याप्यतायुक्तेरिति भावः। नतेति। सर्वत्र कार्यकारणभावस्य प
पजीवनमावश्यकं क्वचित्सोपाधिकत्वं परायत्ततया वश्यम्भावी ... पादकृतरस्येति। स्वव्याघातक

नतस्मात्रोतीति यद्यप्येतत्सदुपाधवाधिकं ... व्याप्यपि अनुकूलतर्काभावादेवाव्यापकत्वात् ... इति ...

बलक्षणं प्रतिकूलतर्केणतस्य साध्याव्याप्यव्यापकत्वनिर्णयादिति भावः। यद्यपि विशेषादनुनिष्कृत्या ... मनुपाधि
वसंशयो न व्यभिचारसंशयाधायकत्वं तस्यापि। तथापि तत्कृतउपाधित्वाभावेन संदिग्धोपाधित्वं तस्य ना
स्तीति भावः॥ साध्यव्यापकतापक्षमिति। साध्यव्यापकताकोटिमित्यर्थः। तथा चोक्तरीत्या साध्यव्याप
कत्वनिर्णय एवतवाद्य। एतेन न तत्संशयाधायकत्वमिति भावः। उन्नयमिति। अनुकूलतर्कमुपाधिर्व्याप्य
तयं। उपाधिरिति। आत्मनः साध्यव्यापकत्वनिर्णयार्थः। अनुकूलतर्कसंवादिदोतो साध्यव्याप्यतयोपाधिः स्वाद
व्यापकतया साध्याव्यापकत्वनिश्चयादिति भावः। सोपाधावित्ति। साध्यमर्णेऽतिशेषः। विरुद्धे साध्यसंबंधाभावेपक्ष
विपक्षे वा सादिति। ध्रुवं। विनिगमकाभावादिति। उपाध्यभावनिरूपाधित्वं गृह्यतेऽवानुकूलतर्काख्या दित्यनुकू
लतर्कभावस्यापि स्वरूपलाभार्थमुपाध्यपजीवकत्वं एकोपयोजनयोरपि परंपरा। एकैतायां पजीव्यत्वाविशेषाद्वि
निगमनाभावइति भावः। अन्येत्विति। क्वचित्साधनवत्तिय घादृत्याविलिंगमन्यस्य साधनस्य साध्यव्याहृत्तिरनुम
त्वरकायानं। तस्मिन्साधने सउपाधिरित्यर्थः। सामान्यपि एतत्पक्षवृत्तिवमुपाधिमा ... इत्यभिप्रेत्योक्तं। तदन्यस्थलेत्वन्य
त्रिवक्क्वचित्साधनवत्तिस्वव्यतिरेकासाध्याभावसाध्याभावसाधनव्यभिचारज्ञानद्वारेवतस्य दूषकत्वमिति भावः
साध्यसाधनसंबंधाभावोपितद्दशायामीति रूपातउक्तं च स्कृत साध्याभावमात्रेणैतात्पर्यं। तावतेव दूषण एवमीनवा
न। अतएव यद्वाहत्यासाध्यं निवर्त्तति इत्युक्तं अतएव चाह। व्यावर्त्तीतहितद्वाहत्याधनवत्त्वमिति। तत्रति। अ

८

लालकत्वस्यार्थः। यत एव तत्र साध्यं व्यावर्तितं अत एव साध्यसाधनसंबंधाभावेपीत्यर्थः। यत्तु अत्र साधनाव

च्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिरिति तात्पर्यं तथा लक्षणमुक्तं भवति तन्न तस्यापूर्वपक्ष

एव दूषितत्वात्। विरुद्धोपाध्यसंग्रहापत्तेः। एतेन साध्यसाधनसंबंधव्यापकत्वे सति साधनाव्यापकत्वमित्यन

नोक्तमिति निरस्तं। विरुद्धसाध्यसाधनसंबंधाभावेन तदुपाध्यसंग्रहापत्तेः। व्यापकत्वेनेति। तन्नापि स्वव्य

तिरेकद्वारा पक्षे साध्याभावसाधनेनाहत्य तस्योपाधित्वप्रयोगेनेत्यर्थः। कस्यचिन्मतं दूषयितुमुपन्यस्यति य

दिति। केवलान्वयिनः साध्यव्यापकत्वमव्यभिचारान्नयनाद्धि। राहुपकत्वाभावादुपाधित्वमस्तीति तन्निष्ट

र्थं व्यतिरेकीत्युक्तं। आपाद्येति। वह्निधूमसंबंधे पाधित्वासिद्धिरित्यर्थः। वह्निधूमसंबंध इति। न ह्यत्र वह्निधू

मसंबंधोपाधित्वमापाद्यं। किंतु वह्निधूमसंबंधपर्वतेतरत्वोपाधिकत्वं। एवं च पर्वते बाधितस्य। धूमपर्वतत्व

मिहेतोरसिद्धमेवेति भावः। धूमाव्यापकत्वेननिश्चितपर्वतेतरत्ववह्निव्यापकत्वमापाद्यमित्यवतात्यर्थमित्यन्ते

न तु मत इति पक्षो व्यापकत्ववद्धर्मव्यापकविनापि दूषणत्वविशेषणाभावान्न साध्यव्यापकत्वसत्तिपक्षो हेतुर्विभ

त्वोपाधित्वप्रयोजकमिति यमन्यं तन्मतमुपन्यस्यति। कश्चिदिति। अन्नेदमनतिमतन्निबीजं। सोपाधेश्च व

न्यथा निवारस्याद्विना उपाधेर्व्यभिचारव्याप्यत्वस्य सर्वदेवाच्चात्रव्यभिचारित्वं तदसिद्धेः। न च तत्र व्यभि ५६

चारानयन वदत्रापि बाधोन्नयनस्य दूषकताबीजस्य सत्त्वादुपाधित्वं स्यादिति वाच्यं। एवं ह्यनुमिति।

विरोधकव्यापकमात्रस्योपाधित्वप्रयोजकत्वादिरपि पदं तत्सार्थकमपत्तेः। न तत्र दूषकत्ववदाशक्यावान्नेत्युतियदित

दाव्यभिचारिण एव हेतोः साधनव्यापकस्येवोपाधित्वन्न दूषकत्वादस्याप्यनन्तत्वमिति तुल्यं। यत्रेति। ५७

हेतोः पक्षवृत्तित्वे तद्व्यापकीभूतस्योपाधेरपि पक्षवृत्तित्वात्तद्व्यतिरेकस्य पक्षासिद्धेर्बाधकं घटत्वव्यापकत्वा

दित्यर्थः। न तु साध्यरूपस्योपाधेस्तत्कलत्रक्षणमव्यापकं। तस्य स्वव्यावर्तकत्वादित्याह। साध्यत्वेति। तथा ५८

च व्यभिचारानयन पक्षसाध्याविशिष्टत्वस्य नवमात्र्यवत्तथा तथा तत एवात्रापीत्यर्थः। यद्यपि साध्य

व्याभिचारी साध्यव्यापकव्यभिचारित्वादित्यन्वोपाधिनिदानं साध्याविशिष्टं तथापि साध्यवत्त्वेनारोपित

सिद्धत्वेन साध्याविशिष्टं। वस्तुतः साध्यव्यापकत्वज्ञानस्य विपक्षबाधकाद्वनव्यभिचारानुमानप्रयोज

कत्वादुपाधिव्यभिचारित्वामवतत्रदेवरित्यतत्कं। एवं च साध्याविशिष्टमिति भावः। अनुमितीति। अत्रेदं

८ चिन्त्यं साध्यतो साध्यस्य साधनाव्यापकत्वासाधारण्यानुपाधित्वमिति कथमसिद्धमिति मात्रोच्छेदः। मयानंतरो

क्तसाधनव्यापकापाधित्वादिमतदूदमिति वाच्यं। तन्मते पियत्र पक्षावृत्तिहेतुस्तत्रैव तस्य तथात्वे न पक्षवृत्ति

हेतौ साध्यस्यानुपाधितया नुमितिमात्रोच्छेदासंभवादिति। प्रसंगादाह। सोपत्ति। कश्चिदशेषायाधिरस्ति न व

त्याकारानसंदिग्धोपाधिः तस्य शंकापिशाचिवेनानतिबंधकत्वादिति। पत्रैवाह। यत्रेति। अत्रेयं तरमि

ना२

त्यापातनतः परमार्थतोऽन्यसाधनेऽपि प्रत्येकं त्रयेकं उपाधिः स्यादेवेति दूषणांतरं द्रष्टव्यं। तृतीयसंदिग्धोपा-
धिमुदाहरति। यथा त्वाकेति। संदिग्धेति। दूषणत्वमात्रं दृष्टांतेनैव। यद्यप्यत्र मेऽपि संदिग्धोपाधिना साध्य-
पाधिना संदिग्धोपाधिना साधनाभाववति साधनसंदेहो बाध्यः। किंतु साधनवत्यव। पक्षरूपसाध्याभाववत्त्वा स्ववृत्ति
संदेहेन साध्याभावसंदेहः स च न व्यभिचारसंदेहतया दोषः। अनुमानेनाक्र― पदर्शयत्वा। तथापि तदु- ना३
ना च्छेदत्तियास्वरस्या वा हि मे तस्याप्रतिबंधकत्वं न्याय्यमिति तस्यापि प्रतिबंधकत्वमेव। फलबलात्। अत एव क्षित्यादिकं दृ-
मित्यादावप्रयोजकता दितिसाहृशोऽपि प्रतिबंधकत्वमेवेति भावः। यद्वा उपाध्यादिसंदेहेन हेतौ त्वङ्कुके-
ह्निको व्यभिचारसंशय आधीयते तस्य फलबलात्तस्य प्रतिबंधकत्वं। यद्यप्युपाधिसंदेहः स्वरूपसंश्चयमनिबं-
धकोऽनज्ञातः परं प्रत्युत तदुद्भावनं ज्ञापनं न तु तदुत्पादकमित्यकिंचित्करं तथापि संदेहज्ञापनमुखेन
परा[ ]भवत्वा। न्नो साधकमानाभावादश्च निपरं तदिति परस्य तत्र साधकाभावमादाय तत्संशयमापाद-
यतीति सप्रयोजनमित्याहु। तुल्यमेव निर्दोषः दृष्टापत्तिमाशंक्य दूषणांतरमाह। संदिग्धोपाधिरि-
ति। तद्व्यतिरेकस्येति। एतत्तु पक्षसाधनव्यापकतासंदेहेन यः संदिग्धोपाधिस्तदभिप्रायेणोक्तं। ननु
तद्व्यतिरेकेनासाधारण्यं बाधदशायां सपक्षीभूतपक्ष एव न स्यादतः न च यत्र पक्षस्य साध्यवत्ता ४७

ज्ञानमिति ३

वनिश्चयात्तत्र सत्याभवाकादिना पक्षेतरत्वस्योपाधिनिश्चयस्तदाभिप्रायेणेदमिति वाच्यं। तत्रापि व्यति-
रेकिणा सत्प्रतिपक्षसंभवात्। न चासाधारण्यं तस्यापि सत्प्रतिपक्षोत्थापकतया दोषत्वादित्यपरितो-
षादाह। पक्षेतर इति। पक्षेतरत्वे ज्ञानदशायामुपाधिदोषत्वं न स्यादिति भावः। स्वत इति। यद्यप्युपाधि-
ज्ञानस्य स्वतः प्रतिबंधकत्वं नास्ति किंतु किंचिन्नोपाधित्वज्ञानवि― टकत्वं तथाप्युपाधिकत्वज्ञानमेव न व्या- नापिति
प्तिधीकारणमित्युक्तमिति भावः। नहि व्यभिचारज्ञानवदस्यादूषणमस्त्वित्याशंक्याह। तस्मादुपाधि-
रिति। यद्यपि ज्ञायमानतया प्रतिबंधकत्वाभावात् स्वव्याप्तसकलंकानास्तितया पक्षपाधिदोषत्ववादिनामपि
केनापि रूपेणास्य दोषत्वं वक्तव्यमेव नमित्यसाधारण्यदोषत्वमवादत्वात्तत्संबंधावाच्यमिति भावः। व्यभिचारो-
पकत्वेनैवास्य दूषणत्वमित्यपि निरस्तं यद्दूषकत्वोक्तादोषत्वनिरस्यमाद्। आदिमेनेति। बीजचिंतनमिति
निश्चितोपाधेर्दूषकताबीजाभिप्रायेणेदं। तस्मादुपाधिनिश्चयादिति उपाधिनिश्चयादोऽवित्यादऽजितामान
स व्यभिचारनिश्चय इत्यर्थः। व्याप्तिविरह इति। तदनुमापकतयेत्यर्थः। यद्यपीदं दूषकताबीजमा-
कांक्षत्वाच्च। व्याप्यं तद्यद्यपि त्रुटिगणवत्त्वाद्व्याप्यत्वादिति ज्ञायेनट्टणवत्वादव्यवस्थितेन व तस्योपाधित्व-
मेव। लक्षणे चेदकासंगदेतत्वात्। आकांक्षावह्निष्ठा तंतु तावत् प्रतियोगिव्यधिकरणसाधनाव्यापकत्व-

ना१ पकर

न१

वानावेमलक्षणासंगृहीतत्वाद्। तथापि दूषकताबीजातिप्रसंगस्यादोषत्वं भ्रम एव। अत एवाप्रयोजकत्वाद
रपि व्याप्त्याराधकत्वनायकत्वस्वादोषत्वोस्वव्यभिचारित्वेन व्याप्तिविरोधोन्नायकत्वं तद्बीजमिति नाक
यत्वोपाधिनास्वव्यभिचारित्वेन साधने साध्यव्यभिचारित्वमनुमेयमित्याह। यद्वेति। एतद्वयत्रव्यभिचारो
धिकरणसन्निकर्षाधीनावाद्यार्थस्तत्रबोध्यः। अन्यथा उपाधिव्यभिचारित्वरूपविशेषदर्शने व्यभिचार
प्रत्यक्षमेवविवक्षितं। करादिदर्शनजन्यपुरुषप्रत्यक्षवत्सन्नीनविषयप्रत्यक्षसामग्र्याबलेनैवात्। नचयत्रा
पि व्यभिचारानुमितिस्तत्रापि तज्जनकपरामर्शस्यैव व्याप्तिधीप्रतिबंधकत्वं संभवति न तस्याप्रतिबंधकत्वमिति
वाच्यं। प्रत्यक्षरणत्वास्पाहविरोधिव्याप्यज्ञानस्य प्रतिबंधकत्वात्। अनुमाने न नु तज्ज्ञानस्य प्रतिपक्षतया तत्र प्रति
बंधकत्वस्येष्टत्वात्। न च ग्राह्याभावानुमितौ तु पि प्रत्यक्षप्रतिबंधकत्वमिति वाच्यं। प्रत्यक्षमात्रमान्यतया तात्व
पि व्याप्तिप्रत्यक्षे प्रत्यक्षसाधारणमनुमित्यादिसाधारणव्यभिचारांशो व्यभिचारज्ञानसामान्यस्यैव प्रतिबंधक
त्वकल्पनात्। अथमन्यथा प्रत्यक्षान्तरात्प्रतिबंधकत्वे पि ग्राहकानां संदेहानामनो व्यभिचारसंदेहस्य व्याप्तिधीप्रति
बंधकत्वमितिभावः। व्याप्तिविरहानुमानद्वयेप्युपाधिमाशंक्य निराकरोति। साधनेति। वह्न्यादिधूमव्यभिचा ४८
री आर्द्रेंधनव्यभिचारित्वादित्यादौ वह्न्यभाववत्त्वह्नित्वादिवदुपाधिव्यभिचारीत्यर्थः। यद्यप्य

नयेति २

तदयोगोलकादौ साधनाव्यापकं तथापि व्यभिचारास्फुरणदशायामेवोपाध्युपन्यासेन तदानीमुपाधिप्रमाया व्यभि
चारानुमितिप्रतिबंधः स्यादिति भावः। उपाधीति। तथा च तदुच्छेदाय तल्लक्षणप्रतिकूलतर्केण तस्य साध्यव्यापकत्व
निर्णयान्नोक्तदोष इति भावः। ननु नोपाधिमात्रोच्छेदः प्रमेयत्वादौ व्यभिचारिणि साधने तदभाववृत्तित्वस्योपाधेः सं
त्त्वात्। साधनाभावप्रसिद्धिरेवानुद्भायादादौ। अवृत्तीति। अत्र व्यभिचारास्फुरणदशायामपि तस्याव्यापकत्वं
स्फुटमेवेति भावः। एतद्व्याप्तिविरहानुमानाभिप्रायेणोक्तमिति ध्येयं। वृत्तिघटितव्यभिचारस्याहृत्तावत्वे
न तत्साध्यव्यापकत्वासंभवात्। यत्तु न यकाध्यापकतावच्छेदकरूपवत्त्वलक्षणो व्यभिचारोऽत्र साध्यः स
च सपक्षविपक्षव्यावृत्त्यादौ यगगनादावस्त्येवेति तन्न। अनुमितिप्रतिबंधार्थं हि व्यभिचारानुमानं नच तस्यज्ञा
नमनुमितिप्रतिबंधकमविरोधिविषयत्वादिति। किंतु विपक्षगामित्वादिज्ञानमेव तथेति। ननु वृत्तिमत्व
पक्षधर्मावच्छिन्नसाध्यव्यापकत्वान्नोक्तदोष इत्यपरितोषादाह। संयोगादाविति। संयोगविशेषादावि
त्यर्थः। तथा च संयोगविशेषाद्वायुः प्रत्यक्ष इत्यत्र संयोगविशेषः प्रत्यक्षव्यभिचारी तद्व्यापकव्यभिचा
रित्वादित्यनुमाने संयोगविशेषावृत्तिर्वै। तद्व्यापकव्यभिचारित्वादिरूपसाधनव्यापकत्वान्नोपाधि
रित्यर्थः। उपाधिवदोषसमानानामुपाधित्वज्ञानाधीनत्वादाह। अपिथेति। व्यभिचारग्रहणनयनदशायां स

त्प्रतिपक्षोत्थापनेनानुमितिप्रतिबन्धात् तदुत्थापनद्वारा स्यादूषणत्वमेवाह दूषयितरुक्तनियमपक्षद्वयन्निष्प्रत्योपाधेः स
त्प्रतिपक्षोत्थापकतापेक्षितापक्षमाश्रित्य तथैव तदाशासमादाह। असाधारणेति केवलान्वयिनि साध्यपक्षस्य
केवलव्यतिरेकिणि विपक्षस्य व्यतिरेके सत्प्रतिवादसाधारण्यासत्त्वहत्यत आह। अन्वयव्यतिरेकिणा
५४ ति। पक्षव्यावर्तकेति। पक्षाव्यावर्तकविपर्यय इत्यर्थः। पूर्वं साधनव्यतिरेकित्वं नोपाधित्वप्रयोजकमिति
तात्पर्यं तावाइति। अत्र च साधनव्यतिरेकित्वं नोपाधित्वप्रयोजकमिति तात्पर्यं। साध्यव्यापकतया आहक
सतीति। इत्याद्याथजन्यत्वमाह तदुपाधित्वस्वीकारादिति। नन्विति। समीचीनप्रतियोगिकाद्दीं इति यस्य प्रतिपक्ष
स्य सोपाधित्वनियम इति यावत्। न तु सत्प्रतिपक्षत्वं हेत्वाभासान्तरं इत्यर्थः। सत्यपि तस्योपाधित्वं तदप्रति
संधाने दनेन दत्ताविशेषितदोषत्वसंभवात्। किंच यथा श्रुतेयत्रिवोपाधेः साध्यव्यापकत्वं तत्रैव स्थापनाया
व्यभिचारसाध्यव्यापकत्वात्र तदुपाधिना तत्र हेत्व्यभिचारणोन्नयथा विशेषादर्शनी संभावसत्प्रतिप
क्षासत्त्ववादग्रिमग्रन्थविरोधः। तथा च यथोक्तमेव मानाहृतं शासां सत्त्वमिति। व्यभिचारणेति शेषः। अत एव
निश्चातस्ता प्रबोधकव्यभिचारादित्यर्थः। निव्याद्विरिति। तत्र यद्यपि निष्ट्यत्वं स तदुपाधिरेव। न च प्रागुत्तावेसा ४८
ध्यव्यापकत्वान्न तथा। तावद्रूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वान्यथापि तथापि तत्त्वं नोपाधित्वप्रसंजकं व

अप्रामाण्यकलत्वं यथा न स्यात् तथाह। शुक्तिवृत्तीति। शुक्तिवृत्तिरजतार्थिप्रवृत्तिजनकज्ञानविषयेत्यर्थः।
रजता।—ताजन्यप्रवृत्तिहेतुज्ञानविषयतात्वादिति हेत्वर्थः। तत्र भ्रमत्वप्रकारिकायां रजतवृत्ते
तादृश्यां विषयतायां न व्यभिचारः। रजतवृत्तित्वमिति। विषयतात्वरूपपक्षधर्मावच्छिन्नस्याध्यव्यापकमि
दं बोध्यं। रजतविषयायतीति। यद्यपि प्रकारत्वान्यदित्येवास्तु। नाविनरजतत्वादौ व्यभिचारः। आक्षायादिभ्रम
दायां तस्य पक्षसमत्वात्। तथापि रजतविशेषवृत्तिप्रकारविशेष्यस्य यस्य अरजते कदापि नाक्षायादि
रूपापारोपरूपव्यभिचारवारणाय स्वर्वप्रतीकमिति ध्येयं। रजतावृत्तित्वमिति। अरजतवृत्तित्वमित्य
र्थः। तत्र रजतत्वादौ न साध्याव्यापकत्वं। रजतावृत्तित्वमिति। रजतमात्रावृत्तित्वमित्यर्थः। तत्र रजतत्वादि
प्रकारकविषयतायां न साध्याव्याप्तिः। न च साधनव्यापकत्वं। रजतनिष्ठस्मरणविषयतायां तन्मते सा
धनाव्यापकत्वात्। विशेषं शेषण विशेष्यतादन विषयता तदइति मते। भ्रमस्थले रजतमात्रवृत्तिविष
यतात्रयसमतान्त्र साधनाव्यापकत्वमित्याहुः। विषयताया इति। विषयत्वेति शेषः। तथा चाश्रयाभि
व्यादिकमिति भावः। विवादपदमिति। शुक्तिनिष्ठप्रवृत्तिजनकमित्यर्थः। एतच्च नागबाधकारणा

य॰ असतः सिद्धसाधनवारणाय॰ रजतज्ञानमिति॰ एतद्भागस्य चाधिकस्य प्रवेशाक्तो रत्वपकत्त
वाछेदकत्वव्याप्तिग्रहदशायामेव सिद्धसाधनापत्तिरपास्ता। युक्ताविति। निर्विषये मनोयोगादौ
व्यभिचारवारणाय ज्ञानपदं॰ अदृष्टद्वारकेत्यपि विशेषणं॰ तेनादृष्टद्वारकज्ञानजन्मान्तराय
एनव्यभिचारः। नच फलज्ञानव्यभिचार इति वाच्यं॰ प्रवर्त्तकत्वे दिन प्रवृत्तित्वावच्छिन्नकार्यताप्रतियो
गिककारणताश्रयत्वे॰ फलज्ञानत्वपायज्ञायोर्हेतुर्न प्रवृत्तित्वावच्छिन्ने प्रवृत्त्यभावेपि दृष्टो फलज्ञाने
नेष्टो॰ व्याप्तिरित्यर्थः। हुः असिद्धिरिति॰ आश्रयासिद्धिरित्यर्थः। विशेषणाभावाद्यत्र विशिष्टाभावान्
न उद्देश्यसिद्धिरप्रसिद्धधिकरणव्याप्तिरकाज्ञानात्॰ सद्व्यामरावा निरूप्यत इति सिद्धान्तादिति॰ ए
तत्व असतावच्छेदकताभिप्रायेण॰ प्रयोजकत्वाभिप्रायमेव प्रयोजकत्वमिति भावः। युक्तौ रजतेति। रजतत्वप्र
कारकप्रवृत्तिप्रयोजकरजतत्वप्रकारकज्ञानविषय इत्यर्थः। नच्चतिरिक्तविषयताश्रय इत्यर्थः॰ त
स्यानिरस्तत्वात् निधानेनावरसग्रस्तत्वात्॰ रजतार्थितजन्यप्रवृत्तिविषयत्वादिति हेत्वर्थः। स्वध ६६
र्मीति। स्वपदं सम्बन्धिपदमहिम्ना तत्र प्रवृत्तिपरं॰ धर्मिपदं विषयपरं। रजतार्थितेति॰ असतस्त्वसि

३१

द्धसाधनवारणाय सम्प्रदायमतेनेदं॰ तदर्थीमेव युक्तावित्यापि। इष्टेति॰ यद्यपि द्वंद्वसमासे हृष्टानामसिद्धिः
कर्मधारये वाधः। तथापीष्टपदस्येष्टतावछेदकपरत्वे इष्टतावछेदकप्रकारकप्रवृत्तिविषयविशेष्यज्ञा
नसाध्यत्वार्थः। नान्वेवं यत्र प्रवृत्तिविषये इष्टासदज्ञानान्न प्रवृत्तिस्तत्र व्यभिचारः। आलदरूपवैशिष्ट्यप्र
तियोगित्वेनेष्टस्यैव तत्प्रकारत्वेनेष्टतावछेदकप्रकारकत्वात्॰ अतएव संसर्गारोपस्थानात्म्या
रोपाश्चत्यरोपात् सद्वः सर्वसिद्ध इति चेन्॰ अत्राङ्कः॰ उक्तयत्नेष्टतावछेदके रजतत्वादिकमेव प्रकारः कि
म५ त्वेकत्वतस्य स्वरूपसंबन्धः॰ संसर्गोपरत्वस्वाश्रयालाद इति नयो भेदः॰ अन्यथा॰ ननुगामप्रवृत्तिलक्षण
कार्यस्यास्याकस्मिकतापत्तिरिति। यद्वा इष्टतावछेदकत्वमिच्छाप्रकारत्वं॰ तथाचैतत्प्रकारकप्रवृत्ति
विशेषविशेष्यकज्ञानसाध्यत्वं कल्प्य॰ एवंचेष्टालदज्ञान फले इष्टास्यैव प्रकारत्वान्नुपगमा स्त४
पिज्ञानयोः समानप्रकारकत्वनियमात्तज्जन्येच्छायापीष्टप्रकारकतया तादृशज्ञानसाध्यत
यात तत्प्रवृत्तेर्नैकव्यतिरेकव्यभिचारः। अन्यथालदिकाले तादृशज्ञानादृशज्ञानसाध्यप्रवृत्तौ व्यभि निर
चातादवस्थ्यापत्तिः। शरोपदि रजतमित्यादिसामानाधिकरण्यानुभवेनानदमात्रस्यैव संसर्गत्वेन

नत्वप्रतियोगिनियारजतादेरवप्रकारत्वात् । अन्यथा नीलो घट इत्यादौ नीलत्वलक्षणापि न स्यादि
ति युक्तमुत्पश्यामः । ननु यत्किंचित्प्रवृत्तिविषयतावच्छेदकरजतस्मरणमादाय अर्थान्तरं · तत्तत्प्रवृ
त्तिविषयतावच्छेदको स एवाननुगम इति चेत् । अत्राहुः । तादृशज्ञाने प्रवृत्तित्वावच्छिन्नसामान्येन रूप
णादेस्तु न तत्प्रवृत्तिप्रतितादवविशेषरूपेण · तथा च प्रकृतप्रवृत्तिविषयत्वेन सामान्येनैव रूप
णतस्य साध्यप्रवेशात् नाननुगमः । नचार्थान्तरं · तत्तत्प्रवृत्तिं प्रति समानविषयताइच्छाज्ञानस्यैव हेतुत्वावधा
रणेन स्वविषयकरजतस्मरणमादाय साधनसाध्यस्य पर्यवसानलाभात् । अतएवेश्वरानुमानस्मदादि
यत्किंचित्उपादानप्रत्यक्षेणार्थान्तरमिति । प्रवृत्तित्वादिति · चिकीर्षाजन्यप्रवृत्तित्वादित्यर्थः । चिकीर्षा
प्रयोज्यजातिविशेषस्यैव लिङ्गत्वात् न नश्वरप्रवृत्तिजीवनयोनियत्नादौ व्यभिचारः । नासाध्यति ·
यद्यपि यत्नस्तु सुखादौ साध्यव्यापकं तथापि साधनावच्छिन्नसाध्यव्यापकत्वाबाधं एवं च सत्त्वप्रवृत्ति
प्रवृत्तिवाग्नित्वं ममव्याप्त्या पाश्चात्त्याभिप्रायेणान्यथा तत्र तदनुपादेयमावत्तिभावः साधनेति · वक्ष्य
माणत्यावत्साधनत्वे व्यापकत्वे प्रमितेः · तथा च साधनेन व्याप्येन घटितत्वान्नायमुपाधिः साध्यव्या ६७

प्याव्यापकत्वे न साध्याव्यापकत्वादित्यर्थः । कार्यपक्षकानुष्टकाकारणपक्षकमादाय अद्वेति · असतो वा
धवारणाय पक्षविशेषणी · तत्र रजतेच्छाजन्यत्वे · स्वरूपकथनपरं · पक्षद्वये तात्पर्यमित्यथाहुः । प्रयो
जकत्वमिष्टसाधारकं बोध्यं । ननु प्रयोजकत्वं कारणाकारणसाधारणं · रजतस्मरणएवतारणकारण
व्यभिचारश्च यस्तु चराद्यादृष्टत्वमपीति · तथा च प्रसाध्याङ्ग · कंता इच्छाप्रवृत्तिजनकत्वाभावव्याप्यं मि
तिभावः । तथा विधमिति · रजतार्थिनां इत्यस्य किं निष्ठप्रवृत्तिजनकमित्यर्थः । न च रजतेच्छात्वादि
प्यवाच्छिन्नाव्यवच्छेदः यथोक्तविशेषणविशेष्यभावो दोषाभावात् तस्य द्वित्वरूपत्वादितिभावः । न चेति
प्राथमिकज्ञानपक्षकानुमानरजतस्मरणपक्षो विशिष्टज्ञानत्वात् आद्यो बाधान्यो राश्रय
सिद्धिरित्यर्थः । ननु न्यायनया विशिष्टज्ञानत्वं विशिष्ट्यविषयकज्ञानत्वं · प्रशेषात्वं निष्ठत्वादिति
साध्याननुगम इत्यत आह · समवायेति । विशिष्टज्ञानत्वेन साधारणेन रूपेण साध्यता · तद्वैयर्थ्य
यात्तदुक्तत्वात् सिद्धमित्यर्थः । अन्यथा वह्न्यादाव गुरुत्वादि विमन्तो प्रसिद्धानुमानमपि न स्यादि
ति भावः । अग्रहीतमिति । ननु दण्डः कुण्डलीयागा इति समूहालम्बने व्याप्तिः । न च तत्रासं

उत्तरानुमाने गृहीतपदो विशिष्टज्ञानेना ५

योगा इति समूहालम्बने ॥ निच्याप्तिः । न च तत्र संसर्गाग्रहएवेति वाच्यं । दण्डसंसर्गावतिस्वरूपे
तत्संसर्गाग्रहेऽन्यथाख्यात्यापत्तेः । एवञ्च निर्विकल्पकाभ्युपगमे तत्राप्यतिव्याप्तिः । अथ धर्म-
धर्मिविषयकत्वे विशेषणाविषयकत्वं । समूहालम्बनेन च न दण्डस्य विशेषणत्वं उरूपस्यातन्निरू-
पितविशेष्यत्वं विषयः । न चावैशिष्ट्यालानेनासमानावैशिष्ट्यप्रतियोगित्वादिरूपं विशेषणत्वादि नि-
विशिष्टज्ञानेपि कथं तत्रासत्तामिति वाच्यं । समवायात्मानेष्वतद्धाहृतिरूपस्य स्वरूपस्य वा सम्बन्ध-
विशेषस्य पारण्णापि तद्विषयत्वेनाभ्युपगमात् । अन्यथा व्याधिकरणप्रकारकज्ञानस्येत्यग्रिमग्र-
न्थविरोधापातरिति चेन्न । अगृहीतत्यादिविशेषणस्य वैयर्थ्यतापातः अग्रिमाणावस-
मूहालम्बनव्यवच्छेदात् । नाप्येवं नेदं रजतमिति ज्ञानस्यापि रजतविशिष्टज्ञानत्वापत्तिरिति
वाच्यं । अत्र हि रजततासंसर्गस्य रजतविशिष्टज्ञानत्वमापाद्यं । अशावत्ति निरजतविशिष्टज्ञानत्वस्या । ना-
धरत्वापत्तेः । नाद्यः । तयोर्धर्मिधर्मिभावानवगाहनात् । न द्वितीयः तत्किञ्चिद्रूपितधर्मधर्मिविष- ९८
यत्वे विवक्षिते । तथासति भ्रमयवानित्यस्यश्वरोवृत्तिनिप्रमेयत्व विशिष्टज्ञानत्वापत्तेः । एवम-

कापद्यमपि किञ्चित्करं । धर्मिधर्मिगोचरत्वस्य प्रत्येकज्ञानासमुच्चयेन ज्ञानद्वयेऽतिव्याप्त्यसम्भवात् ।
तस्मादत्र च्छिन्नाभिमिति । अन्यथाख्यातिरिति । शुक्तिरजतेऽइति वदुत्तरयत्याति: स्यान्नत्वसाद्वेशि-
ष्टविषयकत्वेनान्यथाख्यातिः । विशिष्टाविषयकत्वानभ्युपगमादित्यर्थः । यद्यपि समवायाविषयत्व-
न्पु४ पिविशिष्टान्तरविषयत्वमस्त्यपयामव । अन्यथा व्यधिकरणप्रकारकत्वासम्भवात् तथापि प्रसाक्षि-
ष्टविषयकत्वेन न भ्रमत्वं भ्रमविषयाणामसत्वात् । किन्तु व्यधिकरणप्रकारकत्वेनैवेत्याशयेना- न४
हा व्यधिकरणेति । ज्ञानपदं काकानुमानव्ययेपाधिमात्राद्धानिराकरोति । नावृति । अथमानुम-
नेसाध्यमव्यापकत्वमद्द । इदं ज्ञानमिति । द्वितीयत्नादौ रजतज्ञान इति । तन्मत इति । मून्मते भ्रम-
त्वगावज्ञानेवासाध्यव्यापकत्वमिति भावः । तथा च्वादिति । दोषजन्यत्वादित्यर्थः । अन्यथेति । ज्ञान-
स्य दोषजन्यत्व इत्यर्थः । तयोरिति । भ्रमस्थलीययोरिदंग्रहणरजतस्मरणयोरित्यर्थः । परेणापीति
तथाविषयकत्वात् । प्रपञ्चादसुरिति भावः । प्रागवत्तीति । ननु रजतएव नेदं रजतमिति ज्ञानादपि प्रवृ-
त्यापत्तिः । अन्यथाख्यातिजयेन तत्रापि ग्रहणस्मरणात्मकज्ञानद्वयस्य अकारे रजतप्रतियावस्मृते:

त्पुरोवर्त्तिरजतनिष्ठभेदाविषयत्वात्। रजतभेदे इष्टप्रतियोगित्वज्ञानेपि तस्य पुरोवर्त्तिरजतनिष्ठभेदावि
षयत्वात्। रजतत्वावच्छिन्नप्रतियोगित्वज्ञानेपि तस्य पुरोवर्त्तिनिष्ठत्वाभावात्। न च स्वातन्त्र्यप्रतिज्ञा यत्नेन
वनायां दोष इति वाच्यं। तद्भिन्नत्वाविशेषणत्वेनानुपस्थितत्वात्। अत्रापि प्रतियोगी इदं रजतमिति ज्ञा
नांशे इत्यापत्तेः। किन्तु पुरोवर्त्तिवृत्तित्वविनष्टदीपभेदविशेषणत्वेनानुपस्थितत्वं तच्च तत्राप्यस्त्येवेति
कथं नातिप्रसङ्ग इति चेत् न। पुरोवर्त्तिनिष्ठाभेदप्रत्ययस्य पुरोवर्त्तिरद्वीतासंसर्गाभेदे इत्यर्थः। एवं
च पुरोवर्त्त्यद्वितासंसर्गप्रयुक्तावच्छेदकत्वावज्ञानस्यापि प्रतिबन्धकतया न दृष्टान्ताप्रसिद्धिः
एवं चात्र वाशब्दः समुच्चये इत्याहुः। अत्र प्राभाकरमतानां इष्टज्ञानाप्रसिद्धौ तदभावाप्रसिद्धेः क
थं पृष्टत्वीरिति चेन्न प्रमितौ वस्तुतस्तु पुरोवर्त्यद्वीतासंसर्गाभेदप्रतियोगित्वेनानुपस्थितत्वमि
ष्टस्वातन्त्र्यं तादृशात्यन्ताभावप्रतियोगित्वेनानुपस्थितत्वमिष्टतावच्छेदकं तदिति ध्येयं। न च वि
सिलापादयो भेदविषयकधीसाध्यास्त्याशङ्क्य निषेधति न चेति। इष्टादीनां ज्ञानरजतादिम
त्वविषयत्वेनाभेदविषयत्वमसिद्धमित्यर्थः। अभेदाभिलापरूपव्यवहारस्य तद्विषयकधीसाध्य

प्र५१

चे पि शुक्तावि इदं रजतमिति वदं रजतभिन्नमिति ज्ञानाभेदस्यासंसर्गाग्रहादेवोपपन्नत्वान्न विशिष्टज्ञा
नाभावाद्याद्वालादति। तत्त्वाप्युपेत्योक्तं। वस्तुतः शुक्तावालादिवाक्यविचारादभिलापसमान
विषयकधीसाध्यत्वमेवेति ध्येयं। भ्रमत्वेनेति यथा श्यामा एवात्र न्याम भेदज्ञानं तत्र प्रवर्तकं तथा
तद्भिन्नाभेदग्रहविरहोपि। सर्वत्र तदभेदानुमितिस्थलेत्यर्थः। प्रतिबन्धकाभावस्य का
रणत्वाभ्युपगमे क्षतिः किं त्वस्माकं न सिद्ध्यति आश्रयत्वादौ यद्वेति। इष्टाभेदविषयकानुमितिः न च
त्र सर्वत्र तत्र भेदप्रत्यये प्रतिबन्धकाभेदा— मितिस्वरूपमस्त्येवेति भावः। ननु पर्वतत्वादिप्रकारतावच्छेदकत्व
तद्धर्मज्ञानोपनीतात्वतभेदः पक्षीभूत इति सर्वत्र तदभेदानुमित्या विषयीकर्तुं शक्यत्वात्
निराकरोति न चेति। अविरोधिनाविवेकनिश्चयप्रकारत्वं प्रकृते तच्च न तथात्वमिति भावः। अत ए
वेति। अत एवाभेदज्ञाने भेदो न विषयः तत्त्ववसत्वे प्रतीतीभेदप्रत्यया विरहमात्र न पि प्रत्य
यानन्तभेदग्राहीनतदुत्तरकालीनभेदावगाहिप्रतीत्यभेदज्ञाने स्वविषयीभूताभेदविषयत्वकारीतिके
वलप्रतीत्याभेदविषयोद्विज्ञो पद्यायाते। अन्यथा तत्रापि भेदाभेदविषयकएव प्रत्ययः स्यात्॥

एवं त्रिति। विम्बादिस्थलेपि जले चंद्रत्वकेदप्रत्ययानंतरं दोषजन्यः चंद्रत्वदर्शनमात्रगोचरः प्रत्ययः उत्प
लत्यत इत्याहुः। केचित्तु। यत्र एव इष्टो सदा विषयकं ज्ञानं प्रवर्त्तकं अतएव दोषवलेनासदर्थाय
पि रूप्यादियत्वेन ग्राह्यन इदं प्रत्ययोन ग्राही। सदग्राही ति ग्राह्यार्थि प्रवर्त्तकः एवमादाहमुखाभिमि ति भ्र
मपि आदर्शान्तनमुखत्वात्तावद्वदनुमिति नमुखाभावावच्छेद्या। दि एनीति मुखाभावार्थि प्रवर्त्तिक
अर्थः। दिङ्गोदादासति प्रत्ययात्तत्कानुमितिरूपाः प्रवर्त्तका इति व्राष इत्याहुः। एसापीति यथा
शुक्तौ रजतत्वसंसर्गासत्त्वस्तथा तद्विषयकं न रजतविषयत्वं संसर्गाग्रह इत्यर्थः। वाधस्यापीति।
शुरावर्त्ति निरजतत्वाभावसंसर्गाग्रहरूपत्वात्तस्यापि विशिष्टज्ञानत्वे मानाभावादित्यर्थः तथाच
बाधशून्यानुव्यवसायबलेन यदि विशिष्टधीः स्यात् तदा वाधेस्याद्धतो न सतत्स्या प्रमाणमिति भा
वः। तत्र दीति। अग्रधरजतत्वानुरागवदर्थः। प्राणीति तत्र जन्मनीति। भावः वस्तुत इदानीमुत्पन्न शु
क्त्यादि विशिष्टवाधनस्मरणसद्भावेनापीति ध्येयं। ग्रहणञ्चेति। तथाच समानध्येव विशिष्टबुद्धौ ७०
मानमित्यर्थः। जातीतिन्यायरीत्याकं मिथ्याज्ञानाभावपि संशयव्यवहारे समर्थयति। एकाद

तिवादिन इत्यर्थः। युगपत्प्रवृत्याद्यापत्तौ समाधिमाशङ्कते। अथेति। एवंसत्यनुभूयमानभेदाग्रहे कथं नि
यम इत्यत आह। साधिति। अन्यथेति। यद्यपि न्यायनये लिदत्यद एव तथापि स्वमतदार्ढ्याभिमानेनेदं बोध्यं।
शङ्कामासादिति। ननु प्रवृत्ति विषयप्रत्यक्षं विनान प्रवृत्तिः तन्मात्यक्षवस निधर्म्मस्मारिता रोपः सन्न तो
विति वित्। न। त्वयोपादानप्रत्यक्षस्य प्रवृत्तिहेतुत्वानभ्युपगमात्। अभ्युपगमेवावचापि तत्सङ्गवादिति
भावः। अपिवानुभूयमानस्यारोपसङ्गवद्गन्तस्य स्मरणकल्पने गौरवमित्यनुभूयमानारोपायिम्ना
माणिक इत्याह। प्रत्यक्षेति। स्वमतदार्ढ्याभिमानेनापादितं संशयं निरस्यति। समवेति। मन्मते दोष
रजतेलदत्यदोके। चरङ्ग। लिदत्यद एव। अन्यथाख्यात्यापत्तेन्यायाभावादिति संशय इत्यर्थः। तज्जन्ये
ति। शाह्दप्रमाछाह्वत्रमत्वादिकमित्यर्थः। तत्तन्यहत्तो विजात्यकल्पनेमानाभावात्प्रवृत्तिमाने विशिष्टज्ञा
नाद्धेतुकल्पनात्प्रवृत्तिता वः नयाः प्रत्यक्षकरनत्याः। रङ्ग। प्रवृत्तितयेति। वस्तुगत्यायरुङ्ग। तत्प्रवृत्तितयेत्य
र्थः। प्रतिवन्धादिति। अप्रतिबद्धा चेत्तथेति भावः। तत्रधेछायामानाभावइत्यादौ तत्कटेति। प्रवृत्ति तरन्यथे
त्वापपात्तरिति भावः। दोषात्तरमाह। उत्कटत्वेति। न चोत्कर्षापकर्षरूपो जातिभेद एवास्त्विति वा
च्यं जातत्वाथहत्तिता नियामानेकात्तछायांतद्धि राक्षादिछा त्वदकल्पने मानाभावादिति भावः। पर

एवपुनराह। स्यादेतदिति॰ सम्वादिविसम्वादिप्रवृत्त्योरित्युपलक्षणं॰ सम्वादिविसम्वादिनिवृत्त्योरित्यपि
द्रष्टव्यं॰ क्रमत्वादिति। सर्वस्थले विशिष्टज्ञानस्य क्लृप्तत्वात् प्रत्वादसत्यस्थले च तदुत्पत्त्या तदाग्रहस्यावश्य
कत्वादित्यर्थः। सत्यत्वासत्यत्वप्रयोजकेश्यत्राघः।।गौरवादिति॰ असत्यज्ञानहेतुत्वाकल्पनागौरवा
दित्यर्थः॥ केचित्तु॰ विशिष्टज्ञानत्वेनैव सम्वादिप्रवृत्तिजनकत्वे सम्भवति सत्यविशिष्टज्ञानत्वस्य गुरुत्वा
दित्यर्थस्याजः। असिद्धरन्यतरासिद्धः प्रवृत्तीति॰ विशिष्टस्याप्यवच्छेदकान्तर्भूतत्वे गौरवादिति भावः
यद्यपीष्टविषयत्वावच्छिन्नज्ञानत्वस्याहेतुतावच्छेदकत्वेऽन्यथासत्त्व्यात्या यद्विः प्रत्येकज्ञानद्वयेत्तत्त्वा
•वान्यथापि गुरोर्वर्त्तिज्ञानं हेतुरिष्टज्ञानेनेदाग्राहस्य वच्छेदकमिति भावः। द्रव्येति॰ महत्त्वसमानाधिक
करणोद्भूतरूपवत्त्वस्य वहिरिन्द्रियजन्यद्रव्यसाक्षात्काराहेतोः सत्त्वात् द्रुष्टासांध्यत्वान्नवाद्वुष्ट्वग्राह्यस्या
नुद्भूतस्य रूपचाक्षुषस्पर्शनत्वमिति भावः। कारणात्तेद्व्यवस्थापनफलमाह एवमिति॰ ननु विसम्वादिप्र
वृत्तिहेतुत्वात् यद्यसत्त्वेऽपि तज्ज्ञत्वत्तिरिति उनः प्रवृत्त्यादियोगपद्यमित्याह॰ अथेति॰ घटावि
सन्निधिः … ॰ विसम्वादिनीति। अभिसन्धिमविधानाद। अतएवेति॰ अभिसन्धिमुद्धाटहनुएतः प
रिहरति। भवमिति। ताविति॰ इष्टविषयकप्रवृत्तौ अनिष्टविषयकनिवृत्तौ वेत्यर्थः। तस्यतदाग्र ७५

हस्यान्वरूपायोग्यत्वात् यो यस्य च विशिष्टज्ञानस्यात् तस्य सत्त्वान्न प्रवृत्तियौगपद्यादित्यर्थः। ज्ञानमिति॰ न
तु फलज्ञानेव्यभिचारः॰ तस्य स्वाविषयीभूतोपायप्रवर्त्तकत्वात्॰ न च फलेच्छायैव तदन्यथासिद्धमिति वाच्यं।
तस्यास्त्वहोपायत्वात्॰ अन्यथोपायगोचरकार्यतादिज्ञानस्यापि चिकीर्षयैवान्यथासिद्धत्वेनाहेतुत्वापत्
तेरिति वत्॰ न॰ फलज्ञानातिरिक्तविषयकत्वाद्यानिवेशे च को वयं तु ब्रूमः। फलेच्छाया इष्टसाधनताज्ञानोप
क्षीणत्वेनान्यथासिद्धत्वात् फलज्ञानं प्रवृत्तौ सुतरामन्यथासिद्धं॰ यत्रेच्छा तत्साधनताज्ञानत्वेन हेतुत्वे
तस्यास्तदवच्छेदकत्वात्॰ अथ यत्र यत्साधनताज्ञानं तदिच्छा तत्र प्रवर्त्तिका तथा चेष्टसाधनताज्ञानमेवाव
च्छेदकमस्तु एवञ्च विनिगमनाविरहात् उभयोरपि हेतुत्वं दण्ड॰ चक्रादिवदितिवत् न॰ फलेच्छायामि
ष्टविषयकत्वमिष्टसाधनताज्ञानस्य समानविषयकत्वमिति विनिगमकसत्त्वात्॰ द्वयहेतुत्वेन
त्वमितित्विदमुक्तं विस्तरस्तु निवन्धेन सफलाज्ञानेनानैकान्तिकं तस्याप्रवर्त्तकत्वादेवं तत्साधनताज्ञा
नत्वं प्रवर्त्तकं॰ नत्वतद्विषयामवेति। तद्यवद्धारति॰ तत्प्रवर्त्तकत्वादित्यर्थः। प्रथमप्रवृत्तेति॰ ननु कुञ
त्वेन प्रथममेव इष्टगुरोवर्त्तिज्ञानत्वेन प्रवर्त्तकत्वे कल्पं॰ न तु तद्विशिष्टज्ञानत्वेन॰ सम्वादिविसम्वा

प्रवृत्तौ विशेषसामग्र्यन्तरकल्पनस्यावश्यकत्वादिति चेन्न । न तावताप्यन्यथाख्यातिसिद्धिः । ज्ञानद्वये
प्रत्येकं रजतत्वेष्टसाधनत्वज्ञानित्वस्यासत्वात् । नच एतावदिष्टज्ञानमेव हेतुरिति ज्ञानमवच्छेदकमिति
वाच्यं अग्रेपि दोषस्यान्यथाख्यातेव निरस्यत्वात् । एवं च तत्सत्यत्वासत्यत्वपक्षे हितत्वविशेषसामग्री । नच दोष
दघटिता कारणादिति भावः । साध्विति । यद्यपि प्रथमं गृहीतस्याप्यत्याज्यत्वं कार्यानुरोधिकरपि नत्वा
ख्यात्यादिति साधुसमर्थितं न्यायमतमिति पारदर्शिवक्तुं शक्यमेव । तथापि फलस्य ख्यातिगौरवस्यादोष
त्वादन्यथाख्यातिमतमेव ज्यायस्त्वात् तत्र तु न तथेति भावः । कारणताव्याच्छेदकमिति । एतच्च पक्षद्वयेपि त्रे दृ
ज्ञानहेतुः सम्बन्धादिविसंवादिप्रवृत्त्योः उक्तानुदायदविशिष्टज्ञाने इत्यर्थः । दण्डरूपवदिति । अन्वयव्य
तिरेकप्रतियोगिना दण्डेन सादित्यप्रतियोगिदण्डत्वमन्यथासिद्धमिति शङ्कमुक्तं । सम्प्रति दण्डरूपत्वेन
कारणत्वे सादित्यप्रतियोगिना दण्डेनान्वयव्यतिरेकप्रतियोगिरूपमन्यथासिद्धमित्युच्यत इति विशे
षः । अगृहीतानि । गृहीतावर्तिगृहीतत्यर्थः । उभयोरपीति । तथाच शुक्तिज्ञानस्य शुक्तिविषयत्वमानर्थकं । ७६
रजतविषये तस्याप्रवर्तकत्वादित्यन्यथाख्यातिसिद्धिरिति भावः । इदं च कित्युक्तिमवसमारथ्यानाकिञ्च

कयते । तथाप्येवमपि नन्निर्बन्धहानीत्यदोषः । ननु समवायः प्रत्येयनाज्ञा । क्रियत इत्यस्वरसादाह
विशिष्टस्याचेति । मन्तु यथा समवायास्यैकत्वान्नवावायोः रूपसमवायसत्त्वेपि न रूपाधिकर
णत्वे किन्तु रूपात्यन्ताभावाधिकरणत्वमेव । अधिकरणत्वलाघवात् । तथा समापि घटाभाववि
शिष्टसत्वेपि न पटाभावाधिकरणत्वं । किन्तु पटाभावात्यन्ताभावाधिकरणत्वमेव । अधिकरणस्व
भावादिति चेन्न हि वायोरूपप्रतीतिवत्कदापि तत्र पटाभावप्रतीतिर्न स्यात् । अन्यथा स्वभावलङ्घ
नात् । नचकालरूपावच्छेदात्तदेन घटेभ्यामरक्तरूपाधिकरणत्वभावं चाभ्युपगमात् । नहि तदा
पित्त्रनतघतीतिः तस्यादितिवत् । न । उपनीतलानास्यष्टत्वात् । लौकिकप्रत्यक्षविषयत्वस्यापि हेतु
त्वेन तदा तद्दशावच्छेदतद्दशावोपपत्तेः नावेदेवयापि वक्तुं शक्यं । पलायनस्यसर्वत्र वर्तमानस्य
घटस्यावस्थघटसत्वकालेपि सत्वे तत्तदश्नीतउचरित्वात् । नहि तदा सोन्यत्रगतो मूर्तत्वा
त् । नापि नष्टो नित्यत्वात् । तस्मात्तदानीं सम्बन्धलाघवान्न प्रतीयत इत्यवतत्वमतस्य गतिकत्वा
त् । तद्वत्वन्मतेन सम्भवतिविशिष्टस्यैकत्वात् । ममन्तु तयोस्तदानीं विशिष्टप्रत्ययजननया
वदेत-स्यादिति वाच्यं ममपया पदयायामपिदाहस्य रक्तरूपाधिकरणस्वभावत्वा ६

यत्त्वाभावानस्वरूपसम्बन्धत्वमितिसम्बन्धाभावादेवनप्रतीयतइति।ननुसत्तदानष्टएव॰पटापसा
रणानन्तरञ्चान्यएवात्यन्ताभावइत्यत॰तथाचोत्पादविनाशशीलएवतत्रपटाभावइतिनोक्तदोषइति
चेन्न।समयविशेषसंसर्गिनष्टदत्यंताभावादेवतत्प्रतीत्युपपत्तेरनुरीयतद्वित्वसंसर्गाभावक
ल्पनमानाभावात्॰किञ्चतन्नाशः पटएवपटजन्योन्योवा।नाद्यः पटस्यतदभावसत्वकालेपिस्थि
तत्वान्नाद्यसमानकालीनस्यचनाशकत्वायोगात्।नान्त्यः।एवंसतिध्वंसंप्रतिविरोधिध्वंसानन्तर
स्यैवपटस्यैवपटस्यतद्विरोधित्वमात्रेपर्यवसन्नं॰ननुतद्विरुद्धरूपत्वमितितद्विरुद्धरूपतयापटः
पटविरुद्धरूपतयाचसनप्रतीत॰तस्मात्तत्कचिदवच्छिन्नामकादिशिमतेनेतिमतव्यमितिचेद्
ति॰तात्रेदंचिंत्यं॰यथाचन्मात्रस्वरूपयोर्विशिष्टप्रत्ययजननयोग्यत्वाभावदर्शायोनसंबंधत्वं।किंतु
कदाचिदेवतथात्वं॰तथाविशिष्टधीस्तु॰तथाचपटसर्वकालेविशिष्टसात्वप्रिनसंबंधत्वंतस्येष्टे
तिसंबंधाभावादेवनपटाभावधीःअतिरिक्तसंबंधानवेष्टइष्टमितिचेत्॰तर्किंविशिष्टमन्यत्रदृ
ष्टं।अस्ताविशिष्टप्रत्ययान्यथानुपपत्याअन्यत्राडष्टमथत्रैवतत्कल्प्यतइतिचेन्न।तर्हिका १०३

दाचित्कत्वंविशिष्टप्रतीत्यन्यथानुपपत्यातस्यसंबंधत्वमपिकादाचित्कमत्रैवकल्प्यंननुक्लृप्तत्वात्स्व
रूपयोरेवतथासंबंधत्वंकल्प्यत॰नक्लृप्तस्यावैशिष्ट्यस्येतिचेन्न॰तदाधारत्वाभावादेवनाविशि
ष्टसिद्धिरितिवाच्यत्वात्किमतिप्रसंगापादनेनत्वमितिचेत्॰तर्हित्वएवसमाधाप्यापिनसिध्येत।
लाघवादितिचेत्॰कल्पनंजस्माद्यथाएकस्यसंबंधत्वकल्पनेलाघवं॰तथाकादाचित्कसंबंधत्व
कल्पनेपीतिनस्वरूपयोस्तथात्वंकल्प्यते।किंत्ववैशिष्ट्यस्यैवतथात्वयदधिर्मिकल्पनागौरवं
दोषप्रदानसमवायसिद्धिरपि।अन्यथात्ववैशिष्ट्यसिद्धिरपीतिदुरन्तरापत्तिर्वादिनः।तस्माद्यदि
पटबाधकात्तरावष्टंत्तन्नव्यमतमसमवायसाधनंशक्यात॰आदिवपरंतत्दुष्कराणान्यथेति।
यत्तुवैशिष्ट्यानभ्युपगममध्यवहर्यंतत्रविशेषणतेतिसंवसर्वत्रास्त्विति।नत्र॰समवायपित्रूलप्त्वा
२३ त्फलमुखगौरवादाप्तत्कल्पनागौरवंयदिनत्त्रदोषस्त्वद्वापकृतपित्तुल्यो।अन्येत्वन्यतएवात्ता
विसमवायस्यानभ्युपगमइत्तएववैशिष्ट्यस्यापीति॰अन्यथाध्वंसनाशोपादानमजनापत्तेः।न
चसमवायिनाशस्यसमावतनाशादेवनाशात्रसमवायाभ्युपगमेतत्तरापित्रिदोषणं॰नत्ववैशि

ध्यान्युपगमइतिवाच्यं।लाघवान्निमित्तसंबंधिकारणनाशत्वेनैवतद्धेतुत्वकल्पनात्।नन्वतद्विशेष
समवायिनाशत्वेनाकिंचित्समवायत्वेनजातिरितिचेद्विशिष्टान्यनित्यसंबंधत्वेनैवलाघवाच्च।न
थात्वन्तरंतथाकारणत्वेगौरवमितिनाशत्वावच्छिन्नसिद्धिरितिवदन्ति।तच्चिन्त्यं।प्रामाणिकत्वेन
फलमुखगौरवस्यादोषत्वात्।अन्यथाध्वंसकारणमपिनसिध्येत्।लाघवेनकारणना
शस्यैवकार्यनाशकतयाध्वंसनाशाद्घटादौन्मज्जनापत्तेरितितुल्यत्वात्।एवमन्यत्रापिनिमित्तका
रणंनसिध्येत्तत्तन्नाशात्तन्नाशापत्तेः।यदिचनिमित्तकारणनाशोपिकार्यस्यध्वंसघटादेर्नाशानि
र्णयाकारणासमवायिवद्विशेषणंप्रामाणिकंतदानित्यसंबंधिकारणनाशाद्घटादौन्मज्जनापत्त्या
त्याध्वंसानाशनिर्णयाद्विशिष्यान्यत्वविशेषणमपिप्रामाणिकमितितुल्यं।एवंचयदिवैशिष्ट्यप्रा
माणिकंनवादतिचेत्।तद्धिनप्रमाणाभाववत्यवोच्यते।किमनयाकष्टसृष्ट्या।नचसोपिविशि
ष्टबुद्धित्वस्यैवसत्वात्।उक्तगौरवस्यतदानीमनुपस्थित्यातदपरिपंथित्वात्।किंचव्यक्तित्वावच्छिन्न
गुणत्वावच्छिन्नोत्तयनिरूपितसंबंधत्वं।गौरितिबुद्धिविषयसंबंधत्वमित्यादिनायत्वंनिर्वचनं। २०५
समवायिनाशत्वेनचतद्धेतुत्वंनतदाकथमुक्तदोषावकाशः।नचगौरवंनित्यत्वेध्वंसाश्रितयो

गिवंध्वंसत्वजन्याभावत्वमितितन्निर्वचनेतुल्यत्वात्।एवमप्यत्यंताभावात्यंताभावादौतद्रूपवादकताभावात्र।
अतएवसमवायबाधकमप्येतत्तत्रानतिवक्ष्यते।रूपसंबंधरूपत्वमित्यत्रविशेषणत्वपदंदोषमाह।
रूपापत्तिः।अपलक्षणत्वेतुसएवातिप्रसंगइत्याह।अन्याद्वृत्तीत्याद्युः।कश्चित्तु।तस्यरूपमात्रसंबंधरू
पत्वम्वा।रूपारूपसंबंधत्वंवा।आद्यरूपेति।अंत्येअन्यावृत्ति।तथासत्यतिप्रसंगएवेतिभावइत्या
हुः।अतीतेति।तथाचलिंगक्रमादेवतत्रज्ञानानुमानमितिभावः।गौरवादितिविशेषणसंबंधेदि
त्वस्वरूपसत्त्वेनविशिष्टधीहेतुत्वान्यत्रतथादर्शनादितिभावः।यद्यपितत्रतद्धीत्रीत्यत्रानदस्तुतर
तथापितस्याप्रमेवअतीतादेःज्ञातत्वाभावःस्यात्।तथाचव्यवहारविरोधःबाधकंनत्वेनज्ञातत्व
तिव्यवहारापत्तेःस्यादितिभावः।अतएवस्वरूपसंबंधविषयत्वेनतस्याःप्रमात्वमप्युपपादयति।अतीतादी
विति।दंडकुंडल्याद्यारिवत्तितद्वस्तुपदेयद्वंद्वसमासः।वस्तुतःपदार्थतावच्छेदकतदाश्रयवत्व।
मः।तादात्म्यधियंप्रमाणमुक्त्वामीलत्वघटत्वयोःसमानाधिकरण्यधियंप्रमाणमाह।अथवेतिआ
श्रयिकाश्रयत्वमपिसामानाधिकरण्यंमानमाह।एवमिति।नन्वेवंगतमुपचारणात्यनआह।

सुरयशती। स्यात्नामिति। नन्वेष्टापत्तिः प्रत्यभिज्ञानादिति भावः। अप्यपीति। तथा च प्रवृत्तिनिमित्तभेदाद
यं सदप्रतीयामग इति भावः। नान्वयं च लक्षणा ह्यद्वाधिमिवसमवायः सिद्ध इत्यत आह पक्ष लक्षणवादीति
याह्यथेति। एतच्चोपलक्षणं तथा सति घटो रूपमित्यादिप्रत्ययः स्यादित्यपि बाध्यम्। उक्तमिति। घटस्य
शुक्लं रूपं शुक्लरूपमित्यर्थः। द्वयामयावतीति भावः। तन्नानयस्याभुक्तत्वात्। यद्वा एतद
स्वरसादेवाह। अथवेति। ननु प्रत्यक्षपरं प्रतिनो पन्यासादीमित्यतोऽप्यपित्तिं प्रमाणयति। यद्वेति। न
चेदमसाधारणधर्मतया संशयायकमन्यथा शब्दत्वादिकमपि शब्दादनित्यानित्यतीसाधयेद्वि
शेषादित्यतुआह। यथाह। अन्यान्यान्नावत्त्वमिति। अव्याप्येति। स्वकालावच्छिन्नस्वात्यन्ताभावसम
नाधिकरण इत्तीत्यर्थः। ननु नोक्तस्थलमादाय सिद्धसाधनं नित्याभावति। नित्याभाववृत्त्यभाव
विच्छाजको पार्थिवादित्यर्थः। चत्वर्थाभावविलम्बनादन्यथा यथाश्रुतन्याय नित्याभाववादि
धर्मव्याप्यत्वेनाभाववसौर्वाण्यमभावात्याकः सिद्धिर्हि। तत्साधनविकल्पश्च स्यादिति भावः। २०५
नित्यवत्त्वं साप्रतीयागीवसतिप्रागभावाप्रतियोगित्वमिति ध्वंसमवेन व्यभिचारः। नित्येति। नेति।

नित्याभाववृत्तीतिवेत्यर्थः। तदभावादिति। घटत्वमनित्याप्यवत्तेदस्यतत्रवृत्तेनीनिदवृत्तिरिति भा
वः। किंत्वन्य एवेति। सचनवेदशिरोधीत्ययच्छेदं · · दविनापितसमानाधिकरणः स्यादित्यर्थः।
तस्मादिति। तथा चानुमानेबाधितमिति भावः। अथेति। तथा च कपदविशेषापादनेऽचाप्रयोगनि
रस्तमिति भावः। अनेकापचाराकृति। यद्यप्येवमपितस्यवाचकत्वाभावादिष्टापत्तिरयुक्ता तथा
पिबाधकपदं प्रतिपादकमात्रपरं। नाबालेवप्रकृतसिद्धिरिति भावः। अस्तु समवायः तथापि सन
प्रत्यासत्तिरित्याह। नन्विति। नन्वेतदेव कथमित्यत आह। तद्विनापीति। विशेषणतासत्वादिति
विशेषणताप्रत्यासत्तित्वसत्वादित्यर्थः। शब्दादीनामिति। घटादिसमवायादः प्रथमोपस्थितत्वा
पिविशेषणतायाः क्लृप्तत्वलाघवप्रतिसंधानेसेवचरमोपस्थिताऽपितत्र विषयस्यात्। तदप्रति
संधाने स्वविषयीत्वतायाथाग्रत्याज्यस्याऽपि विशेषणतायाः प्रति नाभावेन समवायोऽदि
विशेषणतायाः प्रत्यासत्तित्वकल्पनेऽप्यतद्विशेषणतायास्तत्राकल्पनादक्लृप्तत्वाद्विशेष।
चरमोपस्थितः समवायादिरवतत्र विषय इति वदन्ति। अत्रेदं चिन्त्यं न तद्विशेषणता

त्वेनाभावादेः प्रत्यासत्तित्वकल्पने गौरवाद्विशेषणतात्वेनैव तत्कल्पने एतद्विशेषणतायाश्च
पि सामान्यतः प्रागेव तत्कल्पनात्। अन्यथा — विसदृशेनेन्द्रियसन्निकर्षेणाभावोपलम्भन
इत्यर्थः। अत एवालोकसंयोगानुपलम्भेऽपि न तदभावप्रत्यक्षः तत्र घटसत्त्वोपलम्भानुपलब्धिसह
चरत्वेन तद्विरोधित्वात्। न चैवमभावप्रमानुपपत्तिः तत्रापि प्रतियोगिसत्त्वस्यैतत्सहचरत्वादि
नियामकत्वात्। इन्द्रियसंबद्धविशेषणतासहकारि — योग्यानुपलब्धेः प्रमाजनिकाया एव निर्वचना
त्। आलोके रूपस्य रजतभ्रमत्वभ्रमसामग्र्यैवोपपत्तेः। यद्वा प्रतियोगिसत्त्वविरोधित्वमनुपल
म्भस्य तत्प्रसञ्जितप्रतियोगिकत्वं। तेन यत्र प्रतियोगि[illegible]सत्त्वेन तदुपलम्भापादनसम्भवस्त
त्रैव तदभावोपलम्भः। अत एव प्रतियोगिसत्त्ववत्त्व क्वचिन्निमित्तविशेषवत्। एतच्चाभावभ्रमस्थले
पीति नोक्तदोषः। ननु प्रतियोगिसमानदेशान्योन्याभावः कथं प्रत्यक्षः तत्राधिकरणे प्रति २०६
योग्यनुपलब्धेरभावात् न च संसर्गाभावप्रत्यक्षमात्रे तन्निरुक्तिरत्र। अत एव तत्प्रतियोगि
मत्त्वाविरोधात्। न च तत्र तादात्म्येन प्रतियोग्यनुपलब्धिर्ग्राहिकासाधारण्ये[illegible]तिवा

च्यं। तथापि तस्याः प्रतियोगिसत्त्वे विरोधित्वाभावादिति चेत्। न तादात्म्येन प्रतियोगिसत्त्वे तद्विरोधि
त्वात्। एवं च संसर्गितया प्रतियोगिसत्त्वविरोधिनी संसर्गितया प्रतियोग्यनुपलब्धिः संसर्गाभावग्रह
हेतुः न चैवमननुगमः अन्योन्याभावप्रत्यक्षसंसर्गाभावप्रत्यक्षयोः प्रत्येकमेव हेतुत्वात्। तथा
त्वं अधिकरणे प्रतियोग्यनुपलम्भाभावेऽपि भावमात्रग्रहणकारणं चक्षुस्त्वक्संयोगः प्रत्यक्षद्वये विशेषसा
मग्री सामान्यसामग्र्या विशेषविशेषस्य हेतुत्वोपपादिति। तत्र। तथासति सामान्यसामग्र्या विर
हादेव तत्रान्योन्याभावप्रत्यक्षानुपपत्तेः। ननु तादृशप्रतियोग्यनुपलम्भाभावः प्रत्यक्षरूपप्रतियोग्यु
पलम्भाव एव वाच्यो न तु तदुपलम्भसामान्याभावः तथा सति हि दोषवशात् प्रत्यक्षे तत्पीतत्वेन घट
स्य भानेऽपि — । अनुमानेन श्वैत्यसंसर्गिस्तदा त्वयोपलभ्यमाने श्वैत्यसंसर्गाभावः श्वेततादात्म्या
भावः प्रत्यक्षतो न प्रतीयेत एवं शंखे पीतावतादात्म्याभावः कथं प्रत्यक्षः स्यात्। कापि पित्ताचा त
तथा प्रत्यक्षरूपोपलम्भस्याप्रसिद्ध्या [illegible] तत्तत्संभवान्न च सा तत्सामग्री। प्रमायां तदुपलम्भसा
मान्याभाव एव हेतुः स चात्र सत्त्वात् यथैवेति वाच्यं युक्ता [illegible] किं च भ्रमाद् [illegible] तो स
त्यां तदुपलम्भसामान्याभावाभावेऽपि चाप्रमारूपापाकस्य शान्तावग्रहोत्पादात्। न च प्रतियोगि

न्याधिकरणसंसर्गप्रत्यक्षविषयत्वाभावप्रयोजकः संसर्गांश्च। क्वचित्तादात्म्यं क्वचिदन्य इति वाच्यं।
एवं वायोरूपाभावप्रत्यक्षं न स्यात्। अधिकरणसंसर्गप्रत्यक्षस्याप्रसिद्धेः। न चाधिकरणे प्रतियो-
गिसंसर्गप्रत्यक्षविषयत्वाभावस्तथा। तथा सति पिशाचतादात्म्याभाव एव न प्रत्यक्षः स्यात्। प्रतियो-
गिसंसर्गप्रत्यक्षाप्रसिद्धेः। यत्तु प्रत्यक्षाधिकरणप्रतियोगिसंसर्गविषयत्वाभावस्य हेतुत्वमिति।
तन्न। मणौ कवकाक्षेन नेत्रस्य वा शरगवमन्ध्यादिपि त्वाग्दर्शनाभावप्रत्यक्षोदयात्। न चात्मावश्या दृत्वा-
जिमतेन्द्रियजन्यप्रत्यक्षविषयत्वाभावस्तथेति वाच्यं। तादृशारोपसात्त्वाभावप्रत्यक्षोदयात्। आ-
रोपनिषिद्धानस्त्यनुपगमात्। नन्वयथार्थत्वमपि प्रत्यक्षविशेषणं तद्वत्तिवत्ताभावभ्रमे तस्यापि
विषयाबाधनयथार्थत्वात्। तादृशप्रतियोगिभ्रमेपि तदभावप्रत्यक्षानुदयाच्चेन्नैवं। नैवं तदिन्द्रि-
यजन्यज्ञानाहार्यप्रत्यक्षे प्रतियोग्यधिकरणसंसर्गविषयत्वाभावस्याहेतुत्वात्। तदारोपस्यथाद-
यत्वात्। न च व्यधिकरणप्रत्यक्षमात्रदायादोषः तत्पुरुषीयत्वस्यापि प्रत्यक्षविशेषणत्वात्। यद्वा। त- १०७
दिन्द्रियत्वं तत्त्वं तथा किं परं। ननु तज्ज्ञानीयपरमतो नोक्तदोषः। न चान्यकालीनतादृशप्रत्यक्ष-

दायादोषतादवस्थ्यात्। तत्कालीनत्वमपि विशेषणं। तथा चाप्रसिद्धिरिति वाच्यं। इदानीं तदभावसत्त्वेऽस-
त्त्वेन दोषस्यैवाभावात्। एतत्कालीनतत्संसर्गविषयत्वाभावस्याहेतुत्वात्। न चैवं प्रतियोग्यप्रसि-
द्धिः प्रतियोग्यारोप एव तदप्रसिद्धेः। एतेनाभावग्राहकः प्रतियोग्यनुपलंभः संशयविपर्ययसाधारणाप्र-
त्यक्षरूपतदुपलंभाभाव एव वाच्यः। अधिकरणे प्रतियोगिसंशयविपर्ययसत्त्वे घटाभावानिश्चयात्। किंञ्चा-
वादेः संशयविपर्ययसामान्यस्य प्रसिद्ध एवेति न तदन्योन्याभावग्राहकप्रतियोग्यप्रसिद्ध्या तदनुपलंभा-
सत्त्व इति परास्तं। तत्पुरुषीयत्वादिविशेषणस्यावश्यकत्वया तदप्रसिद्धेः। अन्यथा मानसे स्थितं
प्रत्यक्षमतिसं — तदभावप्रत्यक्षानुत्पत्त्यापत्तेरिति दिक्। महत्त्वेति। न चैवमुद्भूतरूपपरमाणौ म-
हत्त्वाभावप्रत्यक्षापत्तिः इष्टत्वादुक्तानुपलंभविषयत्वेनैवाभावस्याप्यायत्वात्। अत एव घटादौ मनस्त्वा-
द्यभावो वाद्यादावुद्भूतरूपवदन्योन्याभावोपि प्रत्यक्ष एवेति वदंति। एवमिति। नन्वात्मत्वस्य निर्धार्यत्वे
न तत्राकरणत्वात्कथमेवं। न च शब्दध्वंस एव व्याप्यापारः प्रागभावप्रत्यक्षतयाऽगतेः। न च शब्दमेव व्या-
पारः प्रतियोगितदभावयोरेकत्राजनकत्वादिति चेत्। न। आत्ममनःसंयोगस्य श्रोत्रकर्णशष्कुली-

संयोगस्यवानथात्वादित्याशङ्कः॥ विशेषणतापीति॰ यद्यत्भावे विशेषणतयान्यथासिद्धिस्तद्रूपादाव
पितृत्वैवास्विद्यर्थः॥ नत्रैवेति॰ अन्यथा विशेषणतापदकाणविरितिभावः॥ अन्यथेति। तथा च जन्य
त्वेनत्वस्यतत्रशाधानयथाभावश्चमुपाधिस्तथासमवायिभावत्वेनापीतिभावः॥ नचप्रागभावे साध्याव्या
प्तिः जन्यत्वरूपपक्षधर्म्मावच्छिन्नसाध्यव्यापकत्वादितिभावः॥ आवतीति। अन्योन्याभावे त्वत्यंताभावे त्व
र्थः॥ षष्ठ्यत्वाभावादिति। यद्यप्येवमपि द्रव्यगुणान्यान्यत्वादीनां जातित्वप्रसंगस्तु चीरएतत्व॰ तथापि
जातीशंकरेणघटत्वाभावादजातित्वाभावप्रसङ्गानुमात्रं जातित्वप्रयोजकं॰ किं त्वभावत्वसा
हितं गौरवत्वप्रामाणिकमितिभावः॥ अतएवजातित्वानुपपन्नो जातित्वापादनमन्तुकूलितेनवति। ।
बाधस्यतार्किनुगुणत्वादित्यपास्तं। समावतासति। ननुसमवायिकारणनाशस्यकारणता समवा
यकल्पनोत्तरकल्प्या॰ समवायकल्पनामवप्राथमिकमुपजीव्यन्द्रगुणादिनाशयेनाभावमपि
विषयीकुर्यात्यन्नमित्युपजीव्यविरोधनेन तत्र समवायाभावकल्पनं। प्रत्युतनाशविरोधनसमवा १०८
यिनाशनसमवेतनाशनवत्वं नैत्र मंगीक्रियतां गौरवस्य प्रामाणिकत्वादितिचेत्॰ अत्रवदन्ति अ

श्री॥ गणेशाय। प्रणयकलहकालेसीघ्रणानीतिहलाःप्रकटयतिसनंतामायया कायमस्मिन्। सत्वय
मथनवान्यामाटमालिंगमा। नोधत्यत्तुघनविघ्नध्वंसमस्मात्कमीशां॥ निशम्यसकलंशास्त्रं नानुगुरुमुखां
बुजात्। अनुमानप्रकाशायं रुचिदत्तनतन्यते। संगतिंदर्शयान्नवृशिष्टावधानार्थमिदानीमनुमानंनि
रूपणं क्रियत इति प्रतिजानीते। प्रत्यक्षेति। अत्र प्रत्यक्षस्यानुमानं प्रतिसाक्षात्परंपरया वा हेतुत्वमुप
जीव्यत्वं। यद्यप्यनुमानोपनीतस्य प्रत्यक्षेनुमानस्योपजीव्यत्वं प्रामाण्यग्राहकस्य हेतुत्वमनन्तत
स्यापजीव्यत्वं। तथापि नप्रत्यक्षत्वावच्छेदेन तथा। प्रत्यक्षं तु अनुमानत्वावच्छेदेन तथेति। बौद्धादीनि। तथा
वाल्पवादिविप्रतिपत्तिनिरासपूर्वकनिरूपणं तया प्रथममनुमानं शिष्यजिज्ञासाविषय इत्युपमाननिरू
पणात्पूर्वंभावानुमाननिरूपणस्येतिभावः॥ यद्यपि प्रथमम् क्लिष्टेन बहुविप्रतिपत्तिनिरासः कर्तुम
क्यत इति विपरीत्यमर्हं। तथापि प्रत्यक्षोपमानंपरेरतन्त्रीकृतनीयं यतोऽस्माभिर्बहिर्भावनीयंतदनुपद
र्शनादुपमानमपि नविचारयितुं शक्यत इत्यनुमानं प्राथम्यं। अथानुमानं निरूप्यत इति पाठः अथश
ब्दस्यैवायमर्थः। प्रत्यक्षानंतरमनुमानस्याबाद्धायाकरणानंतरं अनुमानलक्षणं क्रियत इतिवार्थः॥ २

अनुमानप्रकाश